दिनाङ्क: 12.01.2026 प्रात: - 06:55

## अथ वार्ताः

### पीएम-गुजरात

प्रधानमन्त्री नरेन्द्रमोदी उक्तवान् यत् महत्-वैश्विक-अनिश्चिततासु भारतम् अभूतपूर्वं निश्चितताया: चरणं साक्ष्यं करोति यत् पूर्वं न दृष्टम् इति। ह्य: राजकोटस्य कच्छ-सौराष्ट्र-क्षेत्राभ्यां द्विदिवसीय-वाइब्रेण्ट-गुजरात-क्षेत्रीय सम्मेलनस्य उद्घाटनानन्तरं श्रीमोदिना वक्तव्यमिदं प्रदत्तम्। असौ कथितवान् यत् भारतं विकसितराष्ट्रं भवितुं द्रुतगत्या अग्रे गम्यमानम् अस्ति, एतत् लक्ष्यं साधयितुं परिष्कारा: महत्तवपूर्णां भूमिकां निर्वहन्ति।

सभां सम्बोधयन् प्रधानमन्त्री मोदी उक्तवान् यत् वाइब्रेण्ट-गुजरात-शिखर-सम्मेलनं वैश्विक विकासाय, अन्ताराष्ट्रियसहयोग-सहमतीभ्यां च एक: सुदृढ: मञ्च: अभवत्।

### पीएम-युवदिवस

अद्य राष्ट्रीययुवदिवस: वर्तते। अयं दिवस: प्रतिवर्षं जनवरीमासस्य द्वादशे दिनाङ्के महान्-आध्यात्मिकनेतु: दार्शनिकस्य च स्वामिविवेकानन्दस्य जन्मजयन्त्या: अवसरे आचर्यते। अस्मिन् अवसरे प्रधानमन्त्री नरेन्द्रमोदी नवदिल्ल्याम् अस्य वर्षस्य विकसितभारत-युवनेतासंवदस्य समापनसत्रे भागं ग्रहीष्यति।

### जर्मनी चांसलर

जर्मनी देशस्य फेडरल चांसलर पदासीन: मर्ज़् इत्यसौ गुजरातस्य महात्मामन्दिरे प्रधानमन्त्रिणा नरेन्द्रमोदिना सह प्रतिनिधिमण्डलस्तरीय-संवादं कुर्यात्। मर्ज़् इत्यसौ प्रधानमन्त्रिण: नरेन्द्रमोदिन: निमन्त्रणे सति द्विदिवसीय-भारतयात्रायै अद्य प्रात:काले सरदार-वल्लभभाई-पटेल-अन्ताराष्ट्रिय-विमानपत्तनस्थानकं सम्प्राप्तवान्। विदेशमन्त्रालयानुसारि स्वीय-गुजरातस्य यात्रावधौ मर्ज़् इत्यसौ साबरमती-आश्रमे श्रद्धाञ्जलिं समर्पयिष्यति।

### इसरो

इसरो इत्यस्य ऐषम: प्रथमं प्रक्षेपणम् अद्य जायेत। सतीशधवन- अन्तरिक्षकेन्द्र-श्रीहरिकोटात: पीएसएलवी-सी62/ईओएस-एन-1 इत्याख्यम् अभियानम् आरब्धं भवेत्। एतत् भारतीयान्तरिक्षा-नुसन्धान-सङ्घटनस्य-नवक्रमिक-विशिष्ट-वाणिज्यिकम् अभियानमस्ति।

### ऋतु:

उत्तरभारते शीतप्रकोप: घननीहार: च प्रवर्धितुं शक्येते यतो हि तापमाने अपचिति: भवितुं शक्यते। भारतऋतुविज्ञानविभागेन अद्य पश्चिमीराजस्थानाय अतिनीहारस्य स्थितिं दृष्ट्वा रेड् अलर्ट इति रक्तवार्णिकी-सञ्चेतना प्रसारिता। तत्रैव उत्तरप्रदेश-पूर्वीराजस्थान-हिमाचलप्रदेशेभ्य: आरेञ्ज अलर्ट इति नारङ्गवार्णिकी-सञ्चेतना प्रसारिता। सहैव आगामि द्विदिवसीयाय जम्मूकश्मीर-दिल्ली-हरियाणा-सौराष्ट्र-कच्छ-बिहार-इत्येतेभ्य: स्थलेभ्य: येलो अलर्ट इति पीतवार्णिकी-सञ्चेतना प्रसारिता।

क्रिकेट

पुरुष क्रिकेट्क्रीडायां भारतेन ह्य: रात्रौ गुजरातस्य वडोदरायां त्रिस्पर्धानां शृङ्खलाया: प्रथमायाम् एकदिवसीय-स्पर्धायां न्यूजीलैण्डदलं चतुर्-स्तोभै: पराजितम्। तत्रैव, विमेन्स्-प्रीमियर-लीग-क्रिकेट्-क्रीडायां नवीमुम्बई इत्यत्र गुजरात-जायंट्स-दलेन दिल्ली-कैपिटल्स्-दलं चतुर्-धावनाङ्कै: पराजितम्।

।।इति वार्ता:।।